श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री प्रह्लादेन कृतं

# ॥ श्रीनृसिंहकवचम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीनृसिंहकवचम् ॥

नृसिंहकवचं वक्ष्ये प्रह्लादेनोदितं पुरा।
सर्वरक्षाकरं पुण्यं सर्वोपद्रवनाशनम् ॥ 1 ॥

सर्व संपत्करञ्चैव स्वर्गमोक्ष प्रदायकम्।
ध्यात्वा नृसिंहं देवेशं हेमसिंहासनस्थितम् ॥ 2 ॥

विवृतास्यं त्रिनयनं शरदिन्दुसमप्रभम्।
लक्ष्म्यालिङ्गितवामाङ्गं विभूतिभिरुपाश्रितम् ॥ 3 ॥

चतुर्भुजं कोमळाङ्गं स्वर्णकुण्डलशोभितम्।
सरोज शोभितोरस्कं रत्नकेयूरमुद्रितम् ॥ 4 ॥

तप्तकाञ्चनसङ्काशं पीतनिर्मलवाससम्।
इन्द्रादिसुरमौलिस्थ स्फुरन्माणिक्यदीप्तिभिः ॥ 5 ॥

विराजितपदद्वन्द्वं शङ्खचक्रादिहेतिभिः।
गरुत्मता च विनयात् स्तूयमानं मुदान्वितम् ॥ 6 ॥

स्वहृत्कमलसंवासं कृत्वा तु कवचं पठेत्।
नृसिंहो मे शिरः पातु लोकरक्षात्मसंभवः ॥ 7 ॥

सर्वगोऽपि स्तंभवासः फालं मे रक्षतु ध्वनिम्।
नृसिंहो मे दृशौ पातु सोमसूर्याग्निलोचनः ॥ 8 ॥

स्मृतिं मे पातु नृहरिः मुनिवर्यस्तुतिप्रियः।
नासां मे सिंहनासस्तु मुखं लक्ष्मीमुखप्रियः ॥ 9 ॥

सर्वविद्याधिपः पातु नृसिंहो रसनां मम।
वक्त्रं पात्विन्दुवदनः सदा प्रह्लादवन्दितः॥ **10** ॥

नृसिंहः पातु मे कण्ठं स्कन्धौ भूभरणान्तकृत्।
दिव्यास्त्रशोभितभुजः नृसिंहः पातु मे भुजौ॥ **11** ॥

करौ मे देववरदो नृसिंहः पातु सर्वतः।
हृदयं योगिसाध्यश्च निवासं पातु मे हरिः॥ **12** ॥

मध्यं पातु हिरण्याक्षवक्षःकुक्षिविदारणः।
नाभिं मे पातु नृहरिः स्वनाभि ब्रह्मसंस्तुतः॥ **13** ॥

ब्रह्माण्डकोटयः कट्यां यस्यासौ पातु मे कटिम्।
गुह्यं मे पातु गुह्यानां मन्त्राणां गुह्यरूपधृक्॥ **14** ॥

ऊरू मनोभवः पातु जानुनी नररूपधृत्।
जङ्घे पातु धराभारहर्ता योऽसौ नृकेसरी॥ **15** ॥

सुरराज्यप्रदः पातु पादौ मे नृहरीश्वरः।
सहस्रशीर्षापुरुषः पातु मे सर्वशस्तनुम्॥ **16** ॥

महोग्रः पूर्वतः पातु महावीराग्रजोऽग्नितः।
महाविष्णुर्दक्षिणे तु महाज्वालस्तु नैर्ऋतौ॥ **17** ॥

पश्चिमे पातु सर्वेशो दिशि मे सर्वतोमुखः।
नृसिंहः पातु वायव्यां सौम्यां भूषणविग्रहः॥ **18** ॥

ईशान्यां पातु भद्रो मे सर्वमङ्गळदायकः।
संसारभयतः पातु मृत्योर्मृत्युर्नृकेसरी॥ **19** ॥

इदं नृसिंहकवचं प्रह्लादमुखमण्डितम्।
भक्तिमान् यः पठेन्नित्यं सर्वपापैः प्रमुच्यते॥ **20** ॥

पुत्रवान् धनवान् लोके दीर्घायुरुपजायते।
यं यं कामयते कामं तं तं प्राप्नोत्यसंशयम्॥ 21 ॥

सर्वत्र जयमाप्नोति सर्वत्र विजयी भवेत्।
भूम्यन्तरिक्षदिव्यानां ग्रहाणां विनिवारणम्॥ 22 ॥

वृश्चिकोरगसंभूत विषापहरणं परम्।
ब्रह्मराक्षसयक्षाणां दूरोत्सारणकारणम्॥ 23 ॥

भूर्जे वा ताळपात्रे वा कवचं लिखितं शुभम्।
करमूले धृतं येन सिध्येयुः कर्मसिद्धयः॥ 24 ॥

देवासुरमनुष्येषु स्वं स्वमेव जयं लभेत्।
एकसन्ध्यं त्रिसन्ध्यं वा यः पठेन्नियतो नरः॥ 25 ॥

सर्वमङ्गळमाङ्गळ्यं भुक्तिं मुक्तिञ्च विन्दति।
द्वात्रिंशतिसहस्राणि पठेत् शुद्धात्मनां नृणाम्॥ 26 ॥

कवचस्यास्य मन्त्रस्य मन्त्रसिद्धिः प्रजायते।
अनेन मन्त्रराजेन कृत्वा भस्माभि मन्त्रणम्॥ 27 ॥

तिलकं विन्यसेद्यस्तु तस्य ग्रहभयं हरेत्।
त्रिवारं जपमानस्तु दत्तं वार्यभिमन्त्र्य च॥ 28 ॥

प्राशयेद्यो नरो मन्त्रं नृसिंहध्यानमाचरन्।
तस्य रोगाः प्रणश्यन्ति ये च स्युः कुक्षिसंभवाः॥ 29 ॥

किमत्र बहुनोक्तेन नृसिंहसदृशो भवेत्।
मनसा चिन्तितं यत्तु स तच्चाप्नोत्यसंशयम्॥ 30 ॥

गर्जन्तं गर्जयन्तं निजभुजपटलं स्फोटयन्तं हठन्तं
रूप्यन्तं तापयन्तं दिवि भुवि दितिजं क्षेपयन्तं क्षिपन्तम्।

क्रन्दन्तं रोषयन्तं दिशि दिशि सततं संहरन्तं भरन्तं
वीक्षन्तं घूर्णयन्तं करनिकरशतैर्दिव्यसिंहं नमामि ॥ **31** ॥

॥ इति श्रीनृसिंहकवचम् समाप्तम् ॥